मिथिलाविद्यापीठग्रन्थमाला

कुमारिलकारिकावल्यपराभिधा

सौगतसूत्रव्याख्यानकारिका

कुमारिलस्वामिपादकृता

श्रीमता अनन्तलालठक्कुरेण

सम्पादिता

मिथिलाविद्यापीठग्रन्थमाला

प्राचीनाचार्यग्रन्थावली

पञ्चदशपुष्पम्

साधारणसम्पादकः

डः श्रीशीतांशुशेखरवागचिः,

एम्. ए., एल्. एल्. बी., डि. लिट्,

पीठाध्यक्षः

कुमारिलकारिकावल्यपराभिधा

सौगतसूत्रव्याख्यानकारिका

कुमारिलस्वामिपादकृता

मिथिलाविद्यापीठप्राध्यापकेन

श्रीमता अनन्तलालठक्कुरेण

सम्पादिता

मिथिलाविद्यापीठाध्यक्षेण प्रकाशिता

संवत् २०२०] [मूल्यं रूप्यकद्वयम्

Copies of this Volume, postage paid, can be had of the Director,
Mithila Institute, Darbhanga on payment of Rs. 2.00
by M. O. or Postal Order or Cash

All rights reserved

Text printed by Sri Binda Prasad for Darbhanga Press Company (Private) Limited, and Cover, Introduction etc. printed at the Tara Printing Works, Varanasi and Published by Dr. Sitansusekhar Bagchi, Director, Mithila Institute of Post-Graduate Studies and Research in Sanskrit Learning, Darbhanga.

1964

SAUGATASŪTRAVYĀKHYANAKĀRIKĀ

ALSO CALLED KUMĀRILAKĀRIKĀVALĪ

OF

KUMĀRILASVĀMIPĀDA

Edited By

PROF. ANANTALAL THAKUR

MITHILA INSTITUTE

DARBHANGA

1964 *Price Rs. 2.00*

THE GOVERNMENT OF BIHAR established the Mithila Institute of Post-Graduate Studies and Research in Sanskrit Learning at Darbhanga in 1951 with the object *inter alia,* to promote advanced studies and research in Sanskrit learning, to bring together the traditional Pandits with their profound learning and the modern scholars with technique of research and investigations and publish works of permanent value to scholars. This Institute is one of the six started by this Government as a token of their homage to the tradition and scholarship for which ancient Bihar was noted.

Apart from the Mithila Institute, the Nalanda Institute of Post-Graduate Studies and Research in Pali and Buddhist Learning at Nalanda, the Vaisali Institute of Post-Graduate Studies and Research in Jainism and Prakrit Learning at Vaisali, the K. P. Jayaswal Research Institute, the Institute of Post-Graduate Studies and Research in Arabic & Persian and the Bihar Rashtra Bhasha Parishad for Research and advanced Studies in Hindi at Patna have been established and are doing useful work.

In the establishment of the Mithila Institute the State-Government received a generous donation from the late Maharajadhiraja of Darbhanga for construction of the building on a plot of land also donated by him.

As part of this programme of rehabilitating and reorientation of ancient learning and scholarship, the editing and publication of this volume has been undertaken with co-operation of scholars in Bihar and outside. The Government of Bihar hope to continue to sponsor such projects and trust that this humble service to the world of scholarship and learning would bear fruit in the fulness of time.

INTRODUCTION.

The work here presented is called the *Saugatasūtra-vyākhyāna-kārikā*. It is attributed to Kumārilasvāmipāda. Both the titles are interesting. The work expounds Vedantic monism and has nothing to do with Buddhist Philosophy as would seem to be suggested by the colophons. The author makes the point clear that he wrote the treatise for the well-being of one Sugata, who may be presumed to be his disciple. According to the author there was a Sūtra-work by Lord Śiva on which this author wrote a Bhāṣya. The present treatise is a short digest of the views as embodied in the said Sūtra and Bhāṣya.

No portion of the Bhāṣya in question has been quoted in the text. On the other hand, the *Brahmasūtra* of Vādarāyaṇa and the *Yogasūtra* of Patañjali with the Bhāṣyas of Śaṅkara and Vyāsa respectively have been utilised. The Kārikās quote the Yogasūtras to strengthen the monistic position of Vedānta. The references to the *Brahmasūtras* in these Kārikās attract the attention of the reader. However, they cannot be identified with the Śivasūtras alluded to here, for want of corroborative evidence. No tradition is found to establish any relation between the *Brahmasūtras* and Lord Śiva. The Śivasūtras of the Pratyabhijñā School offer no ground to assume their relation with the present treatise. Even if the Śivasūtras in question are not identical with the *Brahmasūtras*, the contents of the former seem to be akin to those of the latter.

The authorship of the treatise also presents no less difficulty. The name Kumārila is well-known as the author of the five expository works on the *Pūrvamīmāṃsābhāṣya* of Śabarasvāmin of which, the *Ślokavārtika*, the *Tantravārtika* and the *Ṭupṭīkā* are extant and the *Bṛhaṭṭīkā* and the *Madhyamaṭīkā* are lost. He is referred to by the surnames Bhaṭṭa and Svāmin. This does not, of course, identify our author with the great Mīmāṃsist. There is no evidence to prove that the Pūrvamīmāṁsā scholar ever wrote on Vedānta. In the Ślokavārtika we find a solitary reference to the Vedānta[1]. The treatise under consideration also does not show much acquaintance with the Bhāṭṭa theories.

1. *Ś. Vār.*, Ātmavāda, 148.

A commentary on the *Mānavakalpasūtra* (Ed. Goldstucker, 1860) has also been attributed to Kumārilasvāmin. The learned editor identifies him with the Mīmāṁsist. We, of course, find no relation between our author and this commentator.

Besides, the style of the treatise precludes the possibility of any such identity. It is certainly much inferior to that as found in the works of Kumārila Bhaṭṭa. Had it been from the pen of the Great Kumārila, the host of commentators and authors on monism in India would have not allowed it to remain in obscurity. But we hear of no commentaries on and no quotations from it in the vast Advaita literature. Under the circumstances, the question of identification of this author is bound to remain an open one.

Our author, however, is well-versed in the different systems of Indian Philosophy. We have already mentioned his knowledge of Vedānta and Yoga systems. A glance at the Appendices will show that the major Upaniṣads like the *Taittirīya*°, *Bṛhadāraṇyaka*°, *Kaṭha*°, *Śvetāśvatara*°, *Muṇḍaka* and *Chāndogya*° have been utilised in this treatise. Minor Upaniṣads like *Kaivalya*, *Devī*°, *Nṛsiṃhottaratāpanī*, and *Ātma*° also seem to be alluded to here. The *Brahmasūtra* finds several references. Thus we find Bṛs. I. i. 1 in & III. IV. i. alluded to in Kā. I. 16. Bṛs. II. i. 11 in Kā. I. 17. Bṛs. IV. i. 15 in Kā. I. 53. Bṛs. IV. i. 19 in Kā. I. 54. Bṛs. I. i. 1 & I. iii. 1 Kā. II. 39. and Bṛs. I. IV. 5. in Kā. II. 40. The fourth chapter of the Bṛs. is separately mentioned in Kā. I. 53. Sub-schools of Vedānta also were known to this author.

Yogasūtra IV. 24 is referred to in Kā. I. 23. Kā. II. 1 seems to allude to Y.S. IV, 18. Y.S. I. 18 finds a reference in Kā. III. 6. Again Y.S. I. 4-12 have been given in III. 20-25 with slight changes to meet the exigence of metre. Kā. III. 58 refers to Y.S. I. 23. The *Vyāsabhāṣya* on the Y.S., as we have mentioned above is also a favourite work of our author.

The Sāṃkhya views have received mixed treatment here. They are sometimes accepted while at other places they stand rejected. *Sāṃkhyasūtra* I. 19 & 20 seem to be alluded to in Kā III. 10. The *Sāṃkhyakārikās* of Īśvarakṛṣṇa (Kā 17, 13 & 3) are referred to by our author in Kā I. 23, & II. 43 and III. 39.

The treatment of the Nyāya doctrines in this treatise deserves more than a mere passing notice. Three Nyāyasūtras (IV. i. 63 1. i. 1 & & I. i. 14) dealing with *niḥśreyasa* and *apavarga* have been referred to. It will be interesting to note that the author wants to show that Gotama agrees with the view of the Vedāntin when he says tad atyanta-vimokṣo-'pavargaḥ. This *sūtra*, according to him, does not deny the enjoyment of eternal bliss in the state of emancipation. The current school of logicians beginning from Vātsyāyana does not accept the enjoyment of bliss by the emancipated soul, whereas Bhāsarvajña's *Nyāyasāra* and Ānandagiri's *Saṅkṣepaśaṅkaravijaya* clearly attest that there was another school of logicians holding the opposite view. Vātsyāyana's treatment of this problem in the *Nyāyabhāṣya* clearly shows that even in his time, the Naiyāyikas were not unanimous on this point. There were some (eke naiyāyikāḥ) who upheld the theory of *ānandamokṣavāda*. We, on our part, think that Vātsyāyana was here, as elsewhere, influenced by the Vaiśeṣika view. Kumārilasvāmipāda, however, bitterly criticises the view of Vātsyāyana and in his opinion, Akṣapāda accepts the enjoyment of bliss by the liberated soul. Our author alludes to the nature of the soul as upheld by the *Naiyāyika*, to whom it is *jaḍa*—an unconscious entity.

The Vijñānavāda of the Buddhists has once been refuted. The Buddhists hold that the soul is nothing but void.

The Karmamīmāṃsakas, according to our author, accept the self as both *jaḍa* (insentient) as well as *ajaḍa* (sentient). The *Ślokavārtika* of Kumārila adduces arguments for holding this view (cf. Śl. vār, Ātmavāda 66ff).

In Kā III. 2 our author refers to the story of Bhartsu as an illustration of erroneous cognition due to defective notion. The story is well-known among the Vedāntins. We give below the version of it as found in the *Tattvabodhinī* on the *Saṅkṣepaśārīraka* (I. 14, Sarasvatī Bhavana Series No. 69 p. 25 f).

A royal priest Bharchu by name became very proud owing to the royal patronage and he used to scorn other courtiers. Once upon a time when Bharchu went out of the capital on some urgent business, his adversaries took the opportunity and spread the rumour of Bharchu's death and his subsequent metamorphosis into a Brahmarākṣasa.

When he came back, he was not allowed to approach the king. The king also placed credence on the authenticity of this news. It came to pass that one day he went out of the palace on some personal business and on his way found Bharchu, emaciated and with long hairs climbing down from a tree and heard him shouting 'Your Majesty, out of rivalry, these people have shut your doors against me'. The king saw him clearly from close quarters but he took him to be nothing but a Brahmarākṣasa.

The only manuscript of the work belongs to the Government Collection of the Asiatic Society, Bengal. Prof. Chintaharan Chakravarti drew the notice of scholars by exhibiting it in a monthly meeting. Subsequently he contributed a small but very informative note in the Journal of the Society (JRASB, Letters, Vol. X, 1944, pp. 39-40). The manuscript has been described in the Descriptive Catalogue of the Sanskrit Manuscripts in the Collections of the Asiatic Society (Government Collection) Vol. XI, under the serial number 8170. The description runs as follows :

Saugatasūtravyākhyānakārikā or *Kumārilakārikā* by Kumārilasvāmin. Substance, Country-made paper 10 × 6¼ inches, Folio 5 (by counting). Lines 18 on a page, Character, modern Nāgara, Appearance, fresh, A fragment.

An exposition in Kārikā form of a sūtra is attributed to God Śiva himself. It is called Saugatasūtra as it constitutes a reply to the enquiries by one Sugata about the nature and attributes of God Śiva. The conclusion arrived at is here Advaita. × × × × The 3rd leaf is missing with ślokas 17-63. × × × And the leaf marked 3 begins with V. 18 and reaches to the number 63 and the first half of the next śloka × × (pp. 435-6).

We carefully examined the Ms. and found it complete in three Prakaraṇas. The Des. Cat. gives the readings of fourteen verses out of the total of *222* verses. We, of course, could not accept all the readings given in the catalogue. The text prepared by us under the guidance of Prof. Chakravarti was gone through by my late revered Gurus MM. Dr. Yogendranath Tarkasāṁkhya-Vedāntatīrtha D. Litt. and Vidyāvācaspati Sasinath Jha. Their active help and encouragement enabled me to present the text in this form. The

single manuscript is full of mistakes and lacunæ as the last appendix will show. We had to make some emendations and additions to prepare a readable text. Constant help and encouragement from Dr. Sitansusekhar Bagchi, the General Editor, was one of the greatest factors in the matter of enabling this treatise to see the light of the day. My friend and collegue Prof. Mahaprabhulal Goswami helped me much in reading the proofs. My grateful thanks are due to all of them. I am also indebted to the authorities of the Asiatic Society and the Mithila Institute, Darbhanga for kindly allowing me to work on this manuscript and for accepting it for publication in the Mithila Institute series respectively.

As I worked under serious handicaps, some misprints have crept in, and a few of them have been corrected in the Ṭippaṇī.

Vāsantīnavamī, 1964.

Anantalal Thakur
Mithila Institute.

भूमिका

अथेयं विद्वद्भ्यः समुपह्रियते कुमारिलस्वामिपादकृता सौगतसूत्रव्याख्यानकारिका । अत्राद्वैतवादो विषयवस्त्विति कृत्वा ग्रन्थकारनामधेयं ग्रन्थनामधेयं च विशेषौत्सुक्य-माधत्तः । मीमांसकभट्टाचार्येण कुमारिलपादेन वेदान्तग्रन्थः कश्चन लिखितो न वेति न परिज्ञायते । प्रस्तुतः प्रवन्धः भाषादृष्ट्या दार्शनिकदृष्ट्या च तस्यैवेति कथनं न सुकरं प्रतिभाति । अत्र ग्रन्थकृता ग्रन्थनामधेयस्य व्याख्यानमधस्तनेन प्रकारेण कृतम् ।

प्रश्नं शिवार्थं सुगतस्य चक्रे
यमुत्तरोक्त्या निवृतं शिवोऽयम् ।
स वै शिवप्रश्न इति प्रसिद्ध-
स्तत्सारसूत्रार्थनिरूपणोऽयम् ॥
शिवप्रसादेन विनिश्चितार्थः
शिवोक्तसूत्रस्य विधाय भाष्यम् ।
इमाः सुसंक्षिप्ततदर्थकारिका—
श्चकारसद्बुद्धिमुदे कुमारिलः ॥

अथ कोऽयं सुगतः यदर्थं शिवप्रश्नो लिखितः, को वायं प्रसिद्धः शिवप्रश्नः ? किं वास्य भाष्यमिति न परिज्ञायते । दृश्यते चैतासां कुमारिलकारिकाणां शाङ्करवेदान्त-प्रस्थानेन दृढः संबन्धः । यद्यत्र सूत्रशब्देन शारीरकसूत्राणां भाष्यशब्देन च शाङ्कर-भाष्यस्य निर्देशोऽभिप्रेतस्तथापि भगवता शिवेन तस्य सम्बन्धो गवेषणामपेक्षिष्यते ।

प्रकरणत्रितयनिबद्धेऽस्मिन् ग्रन्थे द्वाविंशत्यधिकं शतद्वयं श्लोकानामस्ति । अत्र वादरायणसूत्रैः साकं योगशास्त्रस्य पतञ्जलिकृतस्य विशेषव्यवहारो लक्ष्यते । इतस्ततः सांख्यसूत्रैः कापिलैरपि संबन्धो दृष्टः । ईश्वरकृष्णकारिका चात्र व्यवहृता । न्यायशास्त्रीयविषयव्याख्याने भासर्वज्ञस्यैव मतानुसरणं कुमारिलस्य दृष्टम् । अस्त्यस्य वात्स्यायनेन मोक्षमधिकृत्य विरोधः । विज्ञानवादस्योल्लेख एकत्र कृतः । कर्ममीमांसकाः परामृष्टाः । सर्वेभ्य आधिक्येन समायाति उपनिषदां चर्चा । अस्माभिः परिशिष्ट-भागे तैत्तिरीय-बृहदारण्यक-कठ-श्वेताश्वर-मुण्डक-छान्दोग्य-कैवल्य-देवी-नृसिंहोत्तरतापनी-

प्रभृतीनामुपनिषदां तथा ब्रह्मसूत्राणां वादरायणकृतानां कुमारिलकारिकासु संभावितः प्रभावो दृष्टः। वेदान्तिषु प्रसिद्धा भर्तृसुकथा अत्रोदाहृता। अवान्तरवेदान्तप्रस्थानस्य कस्यचिदुल्लेखोऽपि दृष्टः।

अस्य ग्रन्थस्यैकैव मातृका एसियाटिकसोसाइटिस्था पूज्यपादप्राध्यापकश्रीमच्चिन्ता-हरणचक्रवर्तिमहोदयेन विदुषां गोचरीकृता। तस्यैव प्राध्यापकवर्यस्यानुग्रहेणास्य सम्पादनमस्माभिर्यथाकथञ्चित् कृतम्। शास्त्रमूर्त्तिभिः स्वर्गतैर्गुरुवर्यैर्महामहोपाध्यायैः योगेन्द्रनाथवागछि डि लिट्-महाभागैस्तथा शास्त्रमूर्तिभिर्भारतसर्वकारसंमानितै-र्विद्यावाचस्पतिभिः स्वर्गतैर्गुरुवर्यैः शशिनाथझाशर्ममहाभागैश्च पावनदृष्टिभिरेतस्या विशुद्धिविधानं कृतम्। मिथिलापीठाध्यक्षैः डॉ श्रीशीतांशुशेखरवागछि एम्.ए. डि.लिट्-महाभागैरियं कारिकावली मिथिलाविद्यापीठग्रन्थमालायां स्वीकृतेति परं प्रमोदस्थान-मस्माकम्। अस्य मुद्रणविधौ प्राध्यापकवरेण श्रीमता महाप्रभुलालगोस्वामिना भृशमुपकृतोऽस्मि।

मूलमातृकाधिकारिणी एसियाटिकसोसाइटी-संस्था तद्व्यवहारानुज्ञाप्रदानेनास्मान् कृतार्थितवती। तस्यै अन्येभ्यः प्रागुक्तमहोदयेभ्यश्च यथायोगं कृतवेदितां विनिवे-दयामि। अनवधानवशात् समागतास्त्रुटयो ममैवेति विज्ञापयति—

विदुषां विधेयः

श्रीमद्-अनन्तलालदेवशर्मा

मिथिलाविद्यापीठस्थः॥

॥ सौगतसूत्रव्याख्यानकारिका ॥

प्रथमं प्रकरणम्

क्लेशान् हर मृड व्यक्तोदार जीवक विक्रम ।
नरा मलालया मूका गोपालप्रिय ते स्तुतौ ॥१

अवाङ्मनसगम्यस्य गुणातीतस्य वर्णनम् ।
गुणाध्यक्षतया यस्य सोऽनुगृह्णातु नः शिवः ॥२

शिवार्थं सुगतप्रश्नं शिवो व्याकृत यं स्वयम् ।
शिवः प्रश्नः स तत्सूत्रसारव्याख्यानमारभे ॥३

दुःखाभावसुखावाप्ती सर्वो वाञ्छति चेतनः ।
नैकान्त[तो भवेतां तौ] लोकवेदक्रियाश्रयात् ॥४

ब्रह्मवित् परमेतीति ब्रह्मवेदनतः श्रुता ।
आत्यन्तिकपुमर्थाप्तिस्तेनेष्टं तस्य साधनम् ॥५

श्रोत्रियब्रह्मनिष्ठस्य श्रवणं सेवनं गुरोः ।
ईशप्रीत्यर्थकर्मादि जिज्ञासादार्ढ्यसिद्धये ॥६

जातः सुतस्ते, नैषोऽहिरिति वाग्बोधमात्रतः ।
हर्षाभयेक्षणाद् ब्रह्मबोधमात्रं पुमर्थकृत ॥७

विभिन्नार्थत्वतो नास्य विकल्पः कर्मणां भवेत् ।
स्वकार्येऽन्यानपेक्षाया विरोधाज्ज्ञानसंगमः ॥८

योगभाष्ये कृतं कर्मविपाकाभाववर्णनम् ।
निवृत्तेऽदर्शने ज्ञानात् तद्धेतुक्लेशसंचयात् ॥९

देवर्षिनृषु योऽवेद सोऽभूद् ब्रह्मेति हि श्रुतिः ।
न कश्चिद्ब्रह्म वेत्तीति देवानांप्रियवाग् वृथा ॥१०

गुरूपसत्त्या वेदान्तश्रवणादिविधानतः ।
न स्याद् वृथार्थवादोऽयं वामदेवनिदर्शनात् ॥११

तं ज्ञात्वा मृत्युमत्येति नान्यः पन्था विमुक्तये ।
आचार्यवान् वेद पुमानिति च श्रुतिरब्रवीत् ॥१२

विशेषरहितं ब्रह्मविषयं श्रुतिरब्रवीत् ।
तस्य च ज्ञानमात्रत्वात् तत्स्वभावावधारणम् ॥१३

ज्ञाताज्ञातार्थसंसिद्धिर्यद्बलेनानुभूयते ।
स नित्यबोध आत्मा हि ज्ञाताज्ञातविलक्षणः ॥१४

स्पष्टा ब्रह्मात्मता न्यायेनाशङ्क्या सास्त्यदृष्टवत् ।
तदाऽपरोक्ष आत्माऽतो विचारोऽत्र विरोधतः ॥१५

अथातो ब्रह्मजिज्ञासेत्यात्मा ब्रह्मेति वेदनात् ।
पुमर्थ इति च प्राह वेदविद् बादरायणः ॥१६

तर्काणामप्रतिष्ठातो भूतार्था शिष्टसम्मता ।
अलौकिकार्थाभिगमे शरणं श्रुतिरेव नः ॥१७

ज्ञातृज्ञानज्ञेयरूपप्रपञ्चाभावसाक्षिणः ।
निर्दुःखनित्यसुखता प्रथिता प्रत्यगात्मनः ॥१८

द्वैतस्य दुःखमूलत्वं सुखमूलत्वमात्मनः ।
ध्यभावेऽनगतं द्वैतं व्यभिचारेण कल्पितम् ॥१९

अथात्यन्तपुमर्थाप्त्यै द्वैताभावप्रसिद्धये ।
आत्मकामस्य सद्बुद्ध्या[ध्य]त्मतत्त्वं विविच्यते ॥२०

य[द्] इदं प्रत्ययेनात्मविज्ञानं व्यवहर्तृभिः ।
प्रतिपन्नं न तद् युक्तं सदप्रामाण्यदर्शनात् ॥२१

व्यभिचारिषु देहाक्षमनोधीष्वव्यवस्थितेः ।
आत्मनस्तत्त्वमज्ञातं ज्ञेयं शास्त्रप्रमाणतः ॥२२

समुदायस्य चात्मत्वे स्यादेकरसताहतिः ।
अचेतनत्वपारार्थ्ये संघातानां गृहादिवत् ॥२३

गौणः प्रयोगो मुख्यार्थज्ञाने स्याद् भ्रान्तिरन्यथा ।
तस्मान्नाहंप्रत्ययेन यथाभूतात्मनिश्चयः ॥२४

अहं ममेति धीवृत्तिस्तद्भावे भावदर्शनात् ।
अहं ब्रह्मेति वाक्ये तु साक्ष्यात्मा लक्ष्यते तथा ॥२५

आत्माभासस्य संबन्धाच्चेतनेव मतिर्भवेत् ।
तस्या[ः] संबन्धतो देहे साऽस्त्यनित्या त एव हि ॥२६

धीप्राणावविनाभूतौ ज्ञानकर्मप्रवर्तकौ ।
उपासनायां श्रुत्युक्तावुपाधी आत्मलक्षकौ ॥२७

प्रियानर्थानु[भूत्यास्य] साध्योऽर्थः सुधियामियात् ।
सगुणालम्बनं सम्यग् गुणसाक्ष्यात्मवेदनम् ॥२८

धीरेवात्मेति विज्ञानवादिनो मतमस्त्यमत् ।
पराक्प्रत्ययहेतुभ्यां ध्यात्मनोभेदैसिद्धितः ॥२९

पराञ्चि बाधितेऽर्थेऽस्मिन् प्रत्यग् योऽर्थोऽवशिष्यते ।
स धीशब्देनोच्यते चेत् तन्नः किं छिन्नमत्र हि ॥३०

पराच्याः परिणामेन धियोऽर्थाकारता भवेत् ।
स आत्मा यस्य विषयः सा धी[ः] स्वप्रतिबिम्बिता ॥३१

सर्वस्य सर्वदात्मायं स्वप्रकाशः प्रकाशकः ।
अज्ञावजमतज्ज्ञानं शास्त्रेणापोह्य लक्ष्यते ॥ ३२

अज्ञानं स्यात् कथं कस्येत्याशङ्क्यं नापरोक्षतः ।
केवलात्मगतिश्चात्र नान्यमानस्वतन्त्रता ॥३३

अध्यासोऽन्यत्रान्यबुद्धिः स्पष्टोऽस्त्यात्मन्यबाध्यता ।
भेदाभेदानिरूप्यत्वादसिद्धेर्मूलसंगते[ः] ॥३४

ज्ञाने स्वतोऽनवच्छिन्नेऽवच्छिन्नान्यार्थकल्पना ।
बाध्योऽर्थोऽनिर्वाच्यताया इति वेदविदां मतम् ॥३५

अन्यथाग्रहणं दृष्टं वस्त्वग्रहणपूर्वकम् ।
तेनाच्छाद्य तमोऽज्ञानमयथावस्तु दर्शयेत् ॥३६

अध्यस्तानामवस्तुत्वादसङ्गत्वादथात्मनः ।
न स्वभावान्यथाभावः सर्वार्थैर्नभसो यथा ॥३७

शीतोष्णगन्धधूलीभिः संबन्धेऽपि सदागतेः ।
प्रकाशस्य प्रकाश्यार्थैः स्वभावो नान्यथेक्षते ॥३८

नित्या मायेश्वरी शक्तिर्दुर्घटाचिन्त्यकारिणी ।
विद्याविद्ये तत्कृते स्त इति केचित् प्रचक्षते ॥३९

सान्निध्या[द्] ध्यात्मनोर्भेदाभानमज्ञपशोरिव ।
तन्मूलोऽयं भवोऽनादिरात्मज्ञानाद् विनश्यति ॥४०

यथान्योन्यात्मताध्यासो दृष्टोऽयं बुद्धिदेहयोः ।
तथैवात्मधियोः स स्याद् द्रष्टृदृश्यत्वभिन्नयोः ॥४१

व्यवहारोऽपवर्गान्तो विज्ञेयोऽध्यासमूलकः ।
प्रारब्धभोगनिर्वाहोऽध्यासवासनया विदाम् ॥४२

ज्ञानशास्त्रप्रणेतॄणामपि संसारदर्शनात् ।
ज्ञानान्न नाशस्तस्येति चोद्ये सिद्धान्त उच्यते ॥४३

उच्छिन्नमूल उच्छिन्नवृ[क्षस्य] हरितत्ववत् ।
प्रारब्धभोगप्राबल्यात् कञ्चित् कालं स तिष्ठति ॥४४

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे ॥४५

ध्यात्मनोरच्छरूपत्वादन्योन्यप्रतिबिम्बतः ।
[अ]स्मिता हृदयग्रन्थिः स्थूलाहंकारतां गता ॥४६

मोक्षसंसाधकं कर्म स्यादुपासनमेव वा ।
किं ते समुच्चिते ज्ञानयुते वा ज्ञानमेव वा ॥४७

ज्ञानेऽपि तत् किं सांख्यादेरभीष्टं श्रौतमेव वा ।
श्रौतेऽपि श्रुतितात्पर्यं द्वैतेऽद्वैतेऽथवा भवेत् ॥४८

तत्राद्वैतं सविशेषे निर्विशेषेऽथवात्मनि ।
मुमुक्षोरेष सन्देहः सन्देहः साध्यसाधने ॥४९

साध्यस्याधिगमे साक्षान्निश्चयेन निवर्तते ।
सविशेषा कल्पिता धीर्निर्विशेषाद्वयात्मता ॥५०

विपाकारम्भताहानिः श्लेषाश्लेषोऽप्यतो मतः ।
कर्मारब्धविपाकं तु नष्टं तन्नाश्यता कथम् ॥५१

विपाकस्यापि नाशोक्तौ लक्षणाभ्यर्थ्यते वृथा ।
श्रुतियुक्त्यनुभूतीनां बाधश्चातो मतो न सः ॥५२

अनारब्धविपाके ये पूर्वसुकृतदुष्कृते ।
तयोरेव क्षय इति चतुर्थेऽध्याय ईरितम् ॥५३

कुशलाकुशले क्षीणे भोगेनारब्धकर्मणि ।
उपाध्यत्यन्तविलयाज् ज्ञानं ब्रह्मेति चेरितम् ॥५४

आत्मनोऽनात्मधर्मेभ्यो मुक्तिस्तद्भेदवर्णनात् ।
आरब्धकर्मभोगान्तमात्मबोधेऽपि धीस्थितिः ॥
तस्याप्यज्ञवदेव स्याद् व्यवहारस्तु कर्मणः ॥५५

यावदाभासमात्मज्ञः कर्मसंस्कारशेषतः ।
कुर्यात् त्यजेद् वा सदसन्न तु तस्य प्रयोजनम् ॥५६

ज्ञानिनो लक्षणं ज्ञानं न बाह्यं कर्मजं हि तत् ।
सद्वस्तुज्ञापकं ज्ञानं कारकत्वं न तस्य हि ॥५७

हानोपादानविषयज्ञानव्यक्तिः क्रिया जनेः ।
आत्मज्ञानं वस्तुनिष्ठं हानोपादानवर्जनात् ॥५८

उच्छिष्टं ज्ञानिनां भुक्त्वा भवेदमृतभोजनः ।
तद्भुक्तं ज्ञानमुच्छिष्टं तत्प्राप्तिस्तस्य भोजनम् ॥५९

अनेकज्ञानिभिर्भुक्तं सदा सुस्वादमक्षयम् ।
ज्ञानं भुक्त्वा नित्यतृप्तः कृतकृत्यो भवेन्नरः ॥६०

बुभुक्षितो नित्यतृप्तोऽरोषणो रोषवर्जितः ।
सकामश्चासकामश्च याथात्म्यज्ञस्य वेदकः ॥६१

आगमाब्धिं मथित्वार्यैराचार्यैरुद्धृतेऽमृते ।
ज्ञाने पीतेऽमृतत्वं स्याद् देवानां गौणता द्वयोः ॥६२

सदास्वादमपि ज्ञानं सकामेभ्यो न रोचते ।
सदोषरसनात्तेभ्यो यथा मिष्टसितोपला ॥६३

[शुनामत्र घृतं ग]व्यं यथा दुर्गतिकारणम् ।
दुष्टास्वादं च तज्ज्ञेयं तथैवानधिकारिणम् ॥६४

अविज्ञातात्मतत्त्वा ये वेदवेदान्तनिन्दकाः ।
विज्ञम्मन्याः शिष्टवर्त्मद्विषस्ते नाधिकारिणः ॥६५

रजस्तमः सत्त्वगुणै[ः] प्रवृत्ति-
मोहप्रकाशा धिय एव धर्माः ।
आत्मा सदा साक्ष्यविशेष एक
इत्यापरोक्षानुभवाद्विमुक्तिः ॥६६

इति श्रीकुमारिलस्वामिपादकृत[सौगतसूत्रव्याख्यान]कारिकावल्यां प्रथमं प्रकरणम् ।

द्वितीयं प्रकरणम्

भावाभावौ बुद्धिवृत्तेः प्रत्यक् प्रत्येति यः सदा ।
सोऽस्त्यात्मान्यपदार्थानां भावाभावमतिर्यतः ॥१

पश्यामि जिघ्रामीत्याद्य[ा] इन्द्रियैर्बुद्धिवृत्तयः ।
तज्ज्ञात्वा प्रत्यगात्मैव साक्षित्वेनावधारितः ॥२

जागरस्वप्नसुप्तीनां साक्षित्वेनावधारणात् ।
समुत्थानाच्च वपुषः प्रत्यगात्मा स उच्यते ॥३

यत्र नान्यदयं द्रष्टा पश्यत्युपरमाद्धि यः ।
स भूमेत्युक्तितः श्रुत्या प्रत्यग् भूमा विवक्षितः ॥४

अयमर्थोऽल्पबुद्धीनां विचिकित्सापनुत्तये ।
आत्मादेशमहंकारादेशं चोक्त्वा स्फुटीकृतः ॥५

स्तो द्रष्टृदृश्यतेऽद्वैते केवलात्मनि नेति च ।
बृहदारण्यके तेन नास्त्यमूलात्मनोर्भिदा ॥६

विलयाद् वाङ्मनःप्राणतेजसां परदेवता ।
या श्वेतकेतवे प्रोक्ता सा नान्या प्रत्यगात्मनः ॥७

इन्द्रियार्थमनोबुद्धिमहदव्यक्ततः क्रमात् ।
परात्परो यः पुरुषः प्रत्यगात्मेति निश्चितः ॥८

बुद्धेरविषयः प्रत्यक् तद्भावाभावविच्च यः ।
अदृष्टमक्षरं द्रष्टृ तच्चस्थूलादिवर्जितम् ॥९

अणुतास्थूलतादीनामन्योन्यप्रतियोगिनाम् ।
धिया ज्ञानमभावे स्यात् तत्साक्ष्यात्मैव लक्षितः ॥१०

द्रष्टृश्रोतृत्वादयो हि सिध्यन्त्यात्मबलाद्धियः ।
तेन तदासौ साक्ष्यात्मा द्रष्टृभोक्त्रुपलक्षितः ॥११

स्वजाकाशादिशब्दादिगुणहीनत्वहेतुना ।
इन्द्रियाविषयत्वेन बुद्धेरविषयो ह्ययम् ॥१२

मृत्योर्मुखात् स आत्मैव व्यक्तं शब्दादियोगि हि ।
शब्दादिहीनमव्यक्तं य[त्] संचाय्य प्रमुच्यते ॥१३

सर्वगन्धः सर्वरस इत्याद्युक्तिस्तु या श्रुतौ ।
सोपासनार्था तस्मिन् हि सर्वगन्धादिकल्पनात् ॥१४

आत्मज्ञानेऽधिकारः स्याद् बुद्धिशुद्धावुपासनात् ।
कर्मणां चेत्यभिप्रेत्य श्रुत्यन्ते बहुवर्णिते ॥१५

वस्तूपलक्षकत्वेन ज्ञाने वैशिष्ट्यमोरितम् ।
तद्विशिष्टमुपास्यं स्याज् ज्ञेयं तदुपलक्षितम् ॥१६

सर्वोपाधिषु यस्तिष्ठन्नन्तर्यामी श्रुतीरितः ।
अदृष्टद्रष्टृतालिङ्गात् प्रत्यगात्मा स लक्षितः ॥१७

सर्वं ब्रह्मेति वाक्ये स्यात् सर्वस्मिन् ब्रह्मदृष्टितः ।
उपासनं सर्वबाधाद् विज्ञानं शुक्तिरूप्यवत् ॥१८

विवक्षितं विशिष्टं चेन्नेति नेती[ति] नो वदेत् ।
अध्यारोपापवादाभ्यां निष्प्रपञ्चप्रपञ्चनम् ॥१९

अध्यारोपं लोकसिद्धमनुद्यापनुदेच्छ्रुतिः ।
सोऽल्पो बहुर्वा तात्पर्यं नास्मिन् किंत्वपबाधने ॥२०

आरोपेऽल्पेऽपि तद्बाधादुत्तमो ज्ञानमृच्छति ।
बहुविक्षिप्तबुद्धीनामध्यारोपो महात्मनः ॥२१

धीसाक्षित्वेन विज्ञानं तस्याबाधे न चात्मनः ।
ब्रह्मत्वं सुग्रहं तत्रातुष्ट्यर्थं बहुवर्णनम् ॥२२

सत्यं ज्ञानमनन्तं यत् श्रुत्या ब्रह्मोपवर्णितम् ।
देशकालान्यवस्तूनामभावात् प्रत्यगेव तत् ॥२३

उपाधिविलयो ज्ञेयः सत्सम्पत्तिः श्रुतीरिता ।
यस्तस्य साक्षी स ह्यात्मा सत्यं ज्ञानमितीरितम् ॥२४

तस्यान्यबाधशिष्टत्वात् सत्यत्वमनपायिता ।
तद्बाधे बाधविज्ञानं न स्याज् ज्ञानं च तेन सः ॥२५

सत्यं ज्ञानमनन्तं हि सिद्धान्याभावसाक्षिणः ।
लोकव्युत्पन्नसत्यादिशब्दैः स्फुटतयोच्यते ॥२६

न सत्यत्वादयो धर्मा व्यतिरेकासमीक्षणात् ।
अनपायिस्वरूपं स्याद् व्यतिरेके [न] धर्मता ॥२७

कालप्रदेशधर्माभ्यामाम्रेऽम्लमधुरौ रसौ ।
रूपे च पीतहरिते धर्मौ स्तोऽव्यभिचारतः ॥२८

संबन्धभेदाद् भेदोक्त्या शब्दाः पुत्रादयो यथा ।
एकार्था व्यावर्त्यभेदात् सत्यज्ञानादयस्तथा ॥२९

विभुत्वसौक्ष्मासङ्गित्वनित्यत्वाद्या यथा मिथः ।
खाच्च प्रतीता भेदेन न भिन्ना वस्तुवृत्तितः ॥३०

सत्यज्ञानानन्ततया सर्वबाधेऽवधारितः ।
यः साक्षी तस्य चात्मत्वं ब्रह्मत्वमपि संभवेत् ॥३१

वाक्यार्थावगतिर्दृष्टा पदार्थज्ञानपूर्विका ।
पदार्थावगतिः साक्षाद् बाधशेषेऽवधारिते ॥३२

पदेनार्थप्रतीतौ स्यात् पदार्थत्वेन वाच्यता ।
प्रतीतार्थबलेनात्र पदशक्तिर्विभाव्यते ॥३३

नित्यापरोक्ष आत्मेति ब्रह्मेति ह्यद्वितीयता ।
वस्त्वभेदेऽपि तद्भेद इव व्यावर्त्यभेदतः ॥३४

आत्मनो ब्रह्मभिन्नत्वे न सिध्येदद्वितीयता ।
ब्रह्मणोऽप्यात्मभिन्न[त्वे] न सिध्येदपरो[क्ष]ता ॥३५

घटव्योममहाव्योम्नोर्घटोपाधिकृता भिदा ।
स्वरूपे न तु भेदोऽस्ति तथाऽत्मपरमात्मनोः ॥३६

अयं सर्वानुभूरात्मा ब्रह्मेति स्पष्टवेदवाक् ।
अभेदबोधनायैव सृष्टेः ब्रह्मप्रवेशवाक् ॥३७

ब्रह्मवित् परमेतीति प्रक्रम्य श्रुतिरादरात् ।
आत्मशब्दं प्रयुञ्जाना प्राह पर्यायतां तयोः ॥३८

प्रक्रम्य ब्रह्मजिज्ञासां द्युभ्वाद्यायतनात्मनः ।
ब्रह्मत्वं तस्य चात्मत्वं वदन् व्यासोऽभ्युपैति ताम् ॥३९

वदतीति व्याससूत्रे प्राज्ञशब्दप्रयोगतः ।
वेदान्ते गतिसामान्यात् प्रतिपाद्यत्वमात्मनः ॥४०

सर्वाभावः सुषुप्तौ हि सिध्यत्यात्मप्रकाशतः ।
तदभावः केन सिध्येत् तज्ज्ञानं तु विशेषतः ॥४१

आत्मा विशेषः श्रुत्या हि नेति नेतीति वर्णितः ।
सर्वो विशेषो बुद्धौ स्यात् तत्सत्त्वे तत्प्रती[ति]तः ॥४२

सत्त्वात् प्रकाशो रजसः प्रवृत्तिस्तमसोऽज्ञता ।
इत्यादयो धियो ज्ञेया विशेषा न दृगात्मनः ॥४३

आत्मनोऽन्यद् ब्रह्म चेत् स्यादविशेषमगोचरम् ।
कथं घटेत तत्प्राप्तिरात्मा चेद् वेदनाद्धि सा ॥४४

सुषुप्तावात्मनोऽन्योऽर्थो न कश्चिदुपलभ्यते ।
बुद्धिसृष्टावन्यदृष्टेरन्यार्थो बुद्धिहेतुकः ॥४५

श्रोता मन्तेति यो व्यक्तो बुद्ध्या सर्वप्रकाशकः ।
सर्वबाधेऽपि शिष्टस्य तस्य को बाधको भवेत् ॥४६

यथाग्निरनभिव्यक्तः स्थितः सर्वेषु वस्तुषु ।
तथा सदात्मानिश्चेयो व्यक्तश्चोपाधियोगतः ॥४७

स्वभावोपाधिधर्माभ्यां युक्तो व्यक्तोऽस्ति तं बुधः ।
उपाधिधर्मसंत्यागात् स्वभावेनावधारयेत् ॥४८

आगमापायिनो धर्मा उपाधिप्रभवाः समे ।
अनपायिस्वभावः स्यादविशेषचिदात्मना ॥४९

रजस्त[मो]भवा जैवा ऐश्वराः शुद्धसत्त्वजाः ।
ब्राह्माः स्वरसतः सिद्धास्त्रिधा भावा व्यवस्थिताः ॥५०

यो ज्ञातोऽन्यैः प्रत्यगात्मा स एव ब्रह्म शब्द्यते ।
तदात्मतत्त्वं विज्ञेयमनात्मात्मत्वमानिना ॥५१

विशेषं संपरित्यज्य सविशेषापि धीरियम् ।
अवर्ण्यास्त्यविशेषस्य प्रतीचो वर्ण्यतां कथम् ॥५२

विशेषं रसगन्धानां कोऽतिदक्षोऽपि वर्णयेत् ।
चक्षुषोऽगोचरत्वेऽपि तत् सत्त्वं स्वानुभूतितः ॥५३

ज्योत्स्नातपादिभिन्नस्य किं प्रकाशस्य वर्णनम् ।
तमोविलक्षणं वस्तु व्यञ्जकं चेति तद् भवेत् ॥५४

यस्यामहं ममेत्येतदा[गो] जागरणादि च ।
सा धीरस्तीति चेदात्मा तज्ज्ञातास्तीति निश्चिनु ॥५५

अन्योऽन्यापेक्षसंसिद्धिर्लौकिकोऽर्थोऽतिदुर्गमः ।
स्वसिद्ध आत्मान्याभावे सिद्धं यद्बलतोऽखिलम् ॥५६

यद्व्यक्तं तदसन्माया भावाभावविशेषवत् ।
सन्नात्मा येन सदिदं स्वप्नवत् सर्वसाक्षिणा ॥५७

अनुभाव्यः परागर्थो व्यभिचारी भवन्नयम् ।
लक्षयेत् प्रत्यगात्मानं स्वमूलाव्यभिचारिणम् ॥५८

धीभावाभावसाक्ष्यात्मेत्येतत् सम्यग् विचारतः ।
आत्मोपलक्षकं शुद्धधियो बहुकथा वृथा ॥५९

न हि वेदान्तसिद्धान्ते नात्मार्थज्ञेयता मता ।
आत्मोपलक्षकत्वेन तस्यात्मेति च तत्कथा ॥६०

यद्विज्ञानेन सर्वस्य विज्ञानं कथितं श्रुतौ ।
यत्सत्तयान्यत् सदिव ज्ञेय आत्मैव स स्वराट् ॥६१

कुबुद्धिदर्पनाशाय वेदान्ते बहुवर्णितम् ।
नेष्टं तदन्यवाक्त्यागो वाचो विग्लापनाश्रुतेः ॥६२

ध्यभावसाक्षित्वस[मो] नोपायोऽस्त्यात्मवेदने ।
अतएव बहूक्त्वापि नेति नेतीति वेदवाक् ॥६३

अभावे शेषो नाशङ्क्योऽस्त्यात्मसाक्षिप्रयोगतः ।
विज्ञेयत्वादभावस्य तज्ज्ञातात्मावधारितः ॥६४

एवं न शब्दप्रामाण्यमात्मा नैव प्रमीयते ।
शब्दानुमानागम्योऽर्थ आपरोक्ष्येण भासते ॥६५

आरोपितनिवृत्तादौ शब्दप्रामाण्यमिष्यते ।
अविशेषात् स्वरूपे स्यादप्रमेयत्वमात्मनः ॥६६

शब्दे संकेतोऽनुमाने व्याप्तिः कारणमीरितम् ।
सामान्या[त्] तद्ग्रहा[त्] ताभ्यां सामान्यार्थस्य निश्चयः ॥६७

सहकारफलादीनां मिष्टत्वाद्यनुमानतः ।
तथा शब्दाच्च सामान्यमिष्टत्वाद्यर्थनिश्चयः ॥६८

क्वचिच्छब्देन विज्ञानमपरोक्षेऽपि वस्तुनि ।
तत्स्वभावविशेषाच्च मणिमन्त्रौषधे यथा ॥६९

नित्यापरोक्ष एवात्मा येन सर्वापरोक्षता ।
अस्मिन्नन्यापोहसिद्धेर्दृढा धीरपरोक्षता ॥७०

आत्मानं विन्दते यस्तु सर्वभूतगुहाशयम् ।
श्लोकेन यदिवार्धेन क्षीणं तस्य प्रयोजनम् ॥७१

यत्रेमे सदसद्रूपे प्रतिषिद्धे स्वसंविदा ।
अविद्ययात्मनि कृते इति सद्ब्रह्मदर्शनम् ॥७२

विशेषं बाधशेषेऽस्मिन् दृष्टमात्मनि भोक्तरि ।
कर्तुं चेच्छन्ति बोधेन न ते मुह्यन्ति जन्तवः ॥७३

विशेषमविशेषस्य यः पृच्छति दिदृक्षते ।
यश्च ब्रह्मविदं बाह्यलक्षणैर्वेत्ति तौ जडौ ॥७४

दृश्यानित्या च दृग्भिन्ना सदसत्तानिरूपणात् ।
धीरनिर्वचनीयेयं मायैवास्ति महेशितुः ॥७५

अविकारे परे तत्त्वे विश्वं स्वप्नवदुत्थितम् ।
अज्ञानेनावृतं ज्ञानमिति सद्बुद्धिनिर्णयः ॥७६

नात्मभिन्नः परागर्थः स्वतन्त्रस्थित्यभावतः ।
न विरुद्धस्वभावत्वादस्यात्माभेदधर्मते ॥७७

आत्मनो निर्विकारत्वात्तदन्यानृतता श्रुतेः ।
नात्मकार्यं पराक् तस्मान्मायैवेति विदां मतिः ॥७८

कार्यत्वाकारणत्वादि कथ्यते ह्यात्मवित्तये ।
तत्सिद्धावन्यदनृतं कर्तव्यं चान्यदस्ति किम् ॥७९

वेदिता वेदने वेद्यं पराग्रूपं चतुष्टयम् ।
प्रतीतिर्नित्यबोधेऽस्मिन् मायैवमपि साक्षिणि ॥८०

परं फलं जीवनजन्मनोस्तद्
यदात्मतत्त्वावगमो यथावत् ।
सत्कर्मणामेष परो विपाको
धर्मार्थकामस्य च पूर्णकाष्ठा ॥८१

इति श्रीकुमारिलस्वामिपादकृतसौगतसूत्रव्याख्यानकारिकावल्यां
द्वितीयं प्रकरणम् ॥

तृतीयं प्रकरणम्

अक्षैरर्थाकृतिर्बुद्धौ प्रमानुभवजागरः ।
दोषाद् बुद्धीन्द्रियार्थानामयथार्था तु साप्रमा ॥१

भत्सौं पुरस्थे धीदोषादयं प्रेत इति प्रथा ।
अक्षदोषाद् गुडस्तिक्तः शंखः पीत इति प्रथा ॥२

दूरस्थत्वार्थदोषेण वृक्षादिह्रसिमप्रथा ।
सादृश्येऽप्यर्थदोषेण शुक्तौ रूप्यात्मताप्रथा ॥३

तन्मूला सा स्मृतिः स्वप्नः संस्कारोद्बोधमात्रतः ।
प्रत्यभिज्ञोभयालम्बा भोगबन्धभवा इमे ॥४

अनुकूलं सुखं दुःखं प्रतिकूलं विवेकिनः ।
सर्वं धीचेष्टितं दुःखं भवेदन्यानुभावतः ॥५

तदभावः सुषुप्तिः स्यान्मूर्छा बाधाविशेषतः ।
विरामप्रत्ययाभ्यासादसंप्रज्ञात उच्यते ॥६

सोऽत्यन्तकारणोच्छेदान्मोक्षोऽध्यात्मविवेकतः ।
नित्यनिर्दुःखसुखता मोक्षेऽस्त्येव सुषुप्तिवत् ॥७

क्लेशाभावः सुषुप्तस्य स्वप्नस्य[ा]दर्शने यथा ।
तथापवर्ग इत्युक्त्याद्वैतात्मा गौतमेप्सितः ॥८

विमोक्षमक्षपादोऽपि तत्त्वज्ञानेन वर्णयन् ।
बन्धकल्पितत्तासिद्धेर्वेदान्तार्थं न बाधते ॥९

बन्धस्यात्मनि संसर्गं कल्पितं कपिलोऽब्रवीत् ।
असत्त्वादात्मनोऽन्यस्य कुतः सोऽस्तु स्वरूपतः ॥१०

मिथ्याज्ञानस्य नाशेन यन्नष्टं तत्कृतं हि तत् ।
मिथ्याज्ञानकृते द्वैतदर्शने सत्यता कथम् ॥११

निर्दुःखसुखभाङ्मोक्षे पुमान् सुप्तिसमाधिवत् ।
यन्न मोक्षे न तन्नित्यमनित्यं सत्यमस्ति किम् ॥१२

दुःखात्यन्तविमोक्षः स्यादपवर्ग इति ब्रुवन् ।
सूक्ष्मधीगम्यमानन्दमुपेक्ष्यमाह गौतमः ॥१३

चितिं शक्तिं स्वरूपस्थामिति प्राह पतञ्जलिः ।
चितिस्वरूपवादेऽपि स नानन्दं निराकरोत् ॥१४

आत्ममोक्षावनानन्दौ प्रयत्नाद् येन वर्णितः ।
स्वमौढ्यं दर्शितं तेन तद्वचो न ज्ञसंमतम् ॥१५

द्रष्टृतया साक्षि[तया] चित्तं भेदेन दर्शितम् ।
वृत्तिसंसारभाक् चित्तं साक्षी त्वेकरसः सदा ॥१६

चित्तानामेव भेदोऽस्ति नाधिष्ठातुरिति स्फुटम् ।
दृष्टं तद्योगिनः कायव्यूहादद्वैतमीरितम् ॥१७

असंप्रज्ञातयोगे हि सर्वथा द्वैतवर्जितम् ।
अखण्डैकरसं वस्तु तत्साक्षित्वेन लक्षितम् ॥१८

आत्मन्येकरसे साक्षात् चित्तसाक्षित्वलक्षिते ।
आरब्धभोगोपरमे विमोक्षः केवलात्मता ॥१९

नित्यानन्दो विशुद्धोऽपि वृत्तीनां प्रतिबिम्बितः ।
तिरोहितस्वरूपः सन् वृत्याकारेण भाव्यते ॥२०

चित्तस्य वृत्तयः पञ्च ताः प्रमाणविपर्ययौ ।
विकल्पनिद्रास्मृतयः क्लिष्टाक्लिष्टोभयात्मिकाः ॥२१

त्रिधा प्रमाणं प्रत्यक्षानुमानागमभेदतः ।
अन्यान्तर्भावतो नोक्तं विस्तराभ्यासलक्षणम् ॥२२

मिथ्याज्ञानमतद्रूपमनिष्टं स्याद् विपर्ययः ।
शब्दज्ञानानुपाती स्याद् वस्तुशून्यो विकल्पकः ॥२३

अभावप्रत्ययालम्बा वृत्तिर्निद्रा निगद्यते ।
प्रोक्तानुभूतविषयासंप्रमोषः स्मृतिर्बुधैः ॥२४

निरोधे सर्ववृत्तीनां तत्साक्ष्यात्मास्ति केवलः ।
आभासोऽत्रान्यदा वृत्तेर्वस्तूनां दर्पणे यथा ॥२५

संस्कारजनको योगः शास्त्रोक्तोपायतत्त्वतः ।
संस्कारशेषाद् व्युत्थानमात्मा साक्षो समः सदा ॥२६

नानार्थप्रतिबिम्बेषु विशेषो नास्ति दर्पणे ।
बुद्ध्यावस्थाविशेषे तु तथा तद्भासकात्मनि ॥२७

भासितार्थत्ववित् पश्यन्नादर्शं वेत्ति तत्त्वतः ।
तज्ज्ञानं भासितार्थानामागमापायि दर्शनात् ॥२८

भास्याभावे भासकत्वमादर्शस्य न नश्यति ।
भास्यबुद्धेरभावेऽपि तथा तज्ज्ञातुरात्मनः ॥२९

आदर्शात् प्रतिबिम्बानां सत्त्वं तेभ्यो न तस्य तत ।
भास्यार्थासत्यता चित्ते आदर्शादात्मनोऽधिके ॥३०

भास्यस्य सत्त्वासत्त्वाभ्यां न विशेषोऽस्ति दर्पणे ।
शक्तेस्तथात्मन्यज्ञानां भवत्येव विशेषधीः ॥३१

आत्मानं मन्यमानानां शक्त्यभिव्यक्तचेतसाम् ।
तदभावे चेतनत्वमात्मज्ञानां हि जायते ॥३२

अतएव मनोऽसत्त्वे जड आत्मेति केचन ।
अपरे शून्यमेवेति प्रमाणाभावतो जड़े ॥३३

कर्ममीमांसकैरुक्तः कर्ता भोक्ता जड़ाजड़ः ।
अविशेषाद्द्वयज्ञानमात्मास्त्युपनिषन्मतः ॥३४

शब्दानुगतया युक्त्या स एवात्मात्र वर्णितः ।
शब्दानपेक्षा सा युक्त्या तयार्थस्य विनिश्चयात् ॥३५

स्वविज्ञातानुसारेण युक्तिः शक्तिस्त्वनेकधा ।
भिन्ना ह्यर्थस्य स्वभावः सहकार्याधिकारिभिः ॥३६

बाध्या शब्दानुमानाभ्यामक्षसिद्धापि भाणुता ।
अनुमानेन सामान्याद् विशेषाच्छब्दतोऽर्थवित् ॥३७

पदार्थत्वापेक्षया स्याद् द्रव्यत्वस्य विशेषता ।
सामान्यत्वं [तु] तस्य स्यात् स्वव्याप्यक्ष्माद्यपेक्षया ॥३८

कापिले महदादीनां कार्यकारणते मते ।
पिता पुत्रत्वमेकस्य पुत्रपित्रोरपेक्षया ॥३९

स्यात् सामान्यविशेषादिव्यवहारो ह्यपेक्षया ।
तेन शब्देन सामान्यतो नोक्तिर्न विरुध्यते ॥४०

शब्दप्रमाणं प्रबलं पूर्वदुष्टत्वसंभवात् ।
तयोरर्थापरोक्षे तु तत्प्रामाण्यविनिश्चयः ॥४१

दोषाद् बुद्धीन्द्रियार्थानामुक्ता प्रत्यक्षदुष्टता ।
अनुमानस्य दुष्टत्वं हेत्वाभासवशाद् भवेत् ॥४२

द्रव्यत्वादनलानौष्ण्यानुमानं शब्दबाधितम् ।
अस्थित्वात् कम्ब्वशुचितानुमानं शब्दबाधितम् ॥४३

विरुद्धदृष्टान्तवशात् स्याद्विरोधोऽनुमानयोः ।
रात्र्यस्नानग्रहस्नाने शब्दः शब्देन बाध्यते ॥४४

विरोधः शब्दयोरस्ति द्वैताद्वैताभिधानयोः ।
अज्ञातार्थज्ञापकत्वादद्वैतोक्तेः प्रमाणता ॥४५

अनुवादेनोपपन्ना श्रुतिर्द्वैताभिधायिनी ।
अपूर्वार्थत्वतो बाधो नैवाद्वैतश्रुतेर्मतः ॥४६

एकविज्ञानतः सर्वविज्ञानकथनाच्छ्रुतेः ।
स्पष्टमद्वैतमेवेष्टं तत्सत्यत्वस्य चोक्तितः ॥४७

न हि तत्राद्वयं युक्तं हेमभूषणयोरिव ।
अशक्तैर्ज्ञातुमद्वैतमज्ञैस्तु कल्प्यतेऽन्यथा ॥४८

अद्वैत आत्मा यो द्वैताभावसाक्षित्वलक्षितः ।
कथं द्वैतासत्यता स्यादद्वैतावगमं विना ॥४९

सुप्तिं प्रक्रम्याथ पितापितेति कथना[च्छ्रु]तिः ।
अद्वैतमात्मनस्तत्त्वं द्वैतबाधादबूबुधत् ॥५०

अज्ञात आत्मा सहसा सर्वज्ञातस्तु बाध्यते ।
मुख्ये धनपतौ ज्ञाते निःस्वाः स्युरितरे यथा ॥५१

ब्रह्मात्मानमवेत् तस्मात् सर्वमासीदिति श्रुतेः ।
नात्मसत्तातिरिक्ता स्यात् सत्तान्यस्येति निश्चयः ॥५२

पृथक् स्वप्नेनानुभूय सर्वोऽर्थः सर्वदृग् यथा ।
तथानुभूतः सर्वोऽर्थो माययैव न केवलः ॥५३

न सर्वभावोऽत्र किंतु सर्वबाधो विवक्षितः ।
यथा यत्र त्वस्य सर्वमात्मैवाभूदिति श्रुतेः ॥५४

द्वैतेऽनेकरसे सान्ते तद्विरुद्धार्थनिश्चयः ।
अतिसूक्ष्मधियामेव साक्षादात्मानुभूतितः ॥५५

सर्वान्यसत्यमूलेऽस्मिन् विज्ञाते प्रत्यगात्मनि ।
असतोऽन्यस्य यद्भानं तन्महिम्नोऽस्य बोधकम् ॥५६

सदद्वैतमसद् द्वैतमिति योगेऽपि संमतम् ।
अथ.सिद्धेस्तथानुक्तिः साक्षाद्वादोऽन्यथापि नः ॥५७

मन्दबुद्धेः प्रकृत्यादिसंश्रयेऽपि पतञ्जलेः ।
ईश्वराश्रयणात् सर्वं कपिलोक्तं न संमतम् ॥५८

द्वैतनिराकृतेर्बाधः साक्षात् स्वानुभवस्य हि ।
श्रुतेर्बाधोऽनिवार्यः स्यादद्वैतेऽपि निराकृते ॥५९

अनौदासीन्यमेवात्र स्वयं जानातु शुद्धधीः ।
सदोषानुभवो बाध्यो निर्दोषानुभवेन हि ॥६०

आत्माद्वैतं तु साजात्यात् तत्तन्त्रं न पृथग् जडम् ।
इत्यद्वैतमतं युक्तं मूढ़ा न[ाहुः] श्रुतेर्मतम् ॥६१

कुतः सदेवैकमेवेत्यद्वितीयमिति क्रमात् ।
स्वार्थान्तरसजातीयविजातीयनिराकृतेः ॥६२

आत्मानात्मैकता पूर्वं चीरनीरैकता यथा ।
इत्थमद्वैतवादोऽपि कुबुद्धिपरिकल्पितः ॥६३

क्वचिदप्यात्मनोऽन्योऽर्थः सम्यक् सृष्टौ न लभ्यते ।
प्रतीतिर्दोषजातास्य काचदृष्टिर्द्विचन्द्रवत् ॥६४

स्वभावसिद्धो द्वैतस्यानुभवो बुद्धिदोषतः ।
अद्वैतानुभवोऽदोषः प्रमाणश्रुतितत्त्वतः ॥६५

विज्ञेयं सत्यमद्वैतमसंप्रज्ञात ईक्षणात् ।
व्यभिचारेक्षणात्तत्र द्वैतस्यासत्यता भवेत् ॥६६

व्युत्थाने व्यभिचारोऽस्त्यद्वैतस्यापीति नोच्यताम् ।
द्वैतरूपेण तस्यैव प्रथनाद् बुद्धिदोषतः ॥६७

मतिं प्राप्यापि बहुधा गतिर्यस्मिन्न दृश्यते ।
स एषोऽचिन्त्यमाहात्म्य आत्मनात्मा प्रसीदतु ॥६८

ईश्वरस्य प्रसादेन जिज्ञासा प्रत्यगात्मनः ।
तदा सद्गुरुमासाद्य तं वेत्ति श्रवणादिभिः ॥६९

ईश्वरोऽव्याकृतोपाधिः सर्वज्ञः सर्वशक्तिकः ।
तत्प्रसादाय बहुधा उपाया अधिकारिणाम् ॥७०

मुख्यं तत्प्रणिधानं स्यात् स ह्यनुग्राहकः परः ।
तदीहा सर्वभूतेषु मैत्र्यादि च यमादि च ॥७१

यद् यद् वाञ्छेन्नरस्तत्तत् सिध्येत्तस्य प्रसादतः ।
आत्मैव सम्प्रपन्नानामज्ञानां भ्रमकारणम् ॥७२

तस्य क्रीडा विचित्रेयमुच्चावचजगद्विधिः ।
व्यज्यते स्वेच्छयैव स्वं तस्मै बोधात्मने नमः ॥७३

प्रश्नं शिवार्थं सुगतस्य चक्रे
यमुत्तरोक्त्या निवृतं शिवोऽयम् ।
स वै शिवप्रश्न इति प्रसिद्ध-
स्तत्सारसूत्रार्थनिरूपणोऽयम् ॥७४

शिवप्रसादेन विनिश्चितार्थः
शिवोक्तसूत्रस्य विधाय भाष्यम् ।
इमाः सुसंक्षिप्ततदर्थकारिका-
श्चकार सद्बुद्धिमुदे कुमारिलः ॥७५

इति श्रीकुमारिलस्वामिपादकृतसौगतसूत्रव्याख्यानकारिकावल्यां[1]
तृतीयं प्रकरणम् ॥

---

१. °सूत्रभाष्यतत्सारकारिकावल्याः इति मातृकायाम् ।

श्लोकसूची

अक्षैरर्थाकृतिर्बुद्धौ	३. १
अज्ञात आत्मा सहसा	३. ५१
अज्ञानं स्यात् कथं कस्य	१. ३३
अणुतास्थूलतादीनाम्	२. १०
अतएव मनोऽसत्त्वे	३. ३३
अथातो ब्रह्मजिज्ञासे-	१. १६
अथात्यन्तपुमर्थाप्त्यै	१. २०
अद्वैत आत्मा योऽद्वैता-	३. ४६
अध्यस्तानामवस्तुत्वात्	१. ३७
अध्यारोपं लोकसिद्धम्	२. २०
अध्यासोऽन्यत्रान्यबुद्धिः	१. ३४
अनारब्धविपाके ये	१. ५३
अनुकूलं सुखं दुःखम्	३. ५
अनुभाव्यः परागर्थः	२. ५८
अनुवादेनोपपन्ना	३. ४६
अनेकज्ञानिभिर्भुक्तम्	१. ६०
अनौदासीन्यमेवात्र	३. ६०
अन्यथाग्रहणं दृष्टम्	१. ३६
अन्योन्यापेक्षसंसिद्धिः	२. ५६
अभावप्रत्ययालम्बा	३. २४
अभावे शेषो नाशङ्क्यः	२. ६४
अयमर्थोऽल्पबुद्धीनाम्	२. ५
अयं सर्वानुभूरात्मा	२. ३७
अवाङ्मनसगम्यस्य	१. २
अविकारे परे तत्त्वे	२. ७६
अविज्ञातात्मतत्त्वा ये	१. ६५
असंप्रज्ञातयोगे हि	३. १८
अहं ममेति धीवृत्तिः	१. २५
आगमापायिनो धर्माः	२. ४६
आगमाब्धिं मथित्वार्यैः	१. ६२
आत्मज्ञानेऽधिकारः स्यात्	२. १५
आत्मनोऽनात्मधर्मेभ्यः	१. ५५
आत्मनो निर्विकारत्वात्	२. ७८
आत्मनोऽन्यद्ब्रह्म चेत् स्यात्	२. ४४
आत्मनो ब्रह्मभिन्नत्वे	२. ३५
आत्मन्येकरसे साक्षात्	३. १६
आत्ममोक्षावनानन्दौ	३. १५
आत्माद्वैतं तु साजात्यात्	३. ६१
आत्मानात्मैकतापूर्वम्	३. ६३
आत्मानं मन्यमानानाम्	३. ३२
आत्मानं विन्दते यस्तु	२. ७१
आत्माभासस्य संबन्धात्	१. २६
आत्मा विशेषः श्रुत्या हि	२. ४२
आदर्शात् प्रतिबिम्बानाम्	३. ३०
आरोपितनिवृत्तादौ	२. ६६
आरोपेऽल्पेऽपि तद्बाधा-	२. २१
इन्द्रियार्थमनोबुद्धि-	२. ८
ईश्वरस्य प्रसादेन	३. ६६
ईश्वरोऽव्याकृतोपाधिः	३. ७०
उच्छिन्नमूल उच्छिन्न-	१. ४४
उच्छिष्टं ज्ञानिनां भुक्त्वा	१. ५६
उपाधिविलयो ज्ञेयः	२. २४

एकविज्ञानतः सर्व-	३. ४७
एवं न शब्दप्रामाण्यम्	२. ६५
कर्ममीमांसकैरुक्तः	३. ३४
कापिले महदादीनाम्	३. ३६
कार्यत्वाकारणत्वादि	२. ७६
कालप्रदेशधर्माभ्याम्	२ २८
कुतः सदैकमेवेत्य-	३. ६२
कुबुद्धिदर्पनाशाय	२. ६२
कुशलाकुशले क्षीणे	१. ५४
क्लेशान् हर मृड त्र्यक्ष	१. १
क्लेशाभावः सुषुप्तस्य	३. ८
क्वचिच्छब्देन विज्ञानम्	२. ६६
क्वचिदप्यात्मनोऽन्योऽर्थः	३. ६४
गुरूपसत्त्या वेदान्त-	१. ११
गौणः प्रयोगो मुख्यार्थ-	१. २४
घटव्योममहाव्योम्नोः	२. ३६
चितिं शक्तिं स्वरूपस्थाम्	३. १४
चित्तस्य वृत्तयः पञ्च	३. २१
चित्तानामेव भेदोऽस्ति	३. १७
जागरस्वप्नसुप्तीनाम्	२. ३
जातः सुतस्ते नैषोऽहिः	१. ७
ज्ञाताज्ञातार्थसंसिद्धिः	१. १४
ज्ञातृज्ञानज्ञेयरूप-	१. १८
ज्ञानशास्त्रप्रणेतॄणाम्	१. ४३
ज्ञानिनो लक्षणं ज्ञानम्	१. ५७
ज्ञानेऽपि तत् किं सांख्यादेः	१. ४८
ज्ञाने स्वतोऽनवच्छिन्ने	१. ३५
ज्योत्स्नातपादिभिन्नस्य	२. ५४
तत्राद्वैतं सविशेषे	१. ४६
तदभावः सुषुप्तिः स्यात्	३. ६
तन्मूला सा स्मृतिः स्वप्नः	३. ४
तर्काणामप्रतिष्ठातः	१. १७
तस्य क्रीडा विचित्रेयम्	३. ७३
तस्यान्यबाधशिष्टत्वात्	२. २५
तं ज्ञात्वामृत्युमत्येति	१. १२
त्रिधा प्रमाणं प्रत्यक्षा-	३. २२
दुःखात्यन्तविमोक्षः स्यात्	३. १३
दुःखाभावसुखावाप्ती	१. ४
दूरस्थत्वार्थदोषेण	३. ३
दृश्यानित्या च दृग्भिन्ना	२. ७५
देवर्षिनृषु योऽवेद सो-	१. १०
दोषाद् बुद्धीन्द्रियार्थानाम्	३. ४२
द्रव्यत्वादनलानौष्ण्या-	३. ४३
द्रष्टृतया साक्षितया	३. १६
द्रष्टृश्रोतृत्वादयो हि	२. ११
द्वैतनिराकृतेर्बाधः	३ ५६
द्वैतस्य दुःखमूलत्वम्	१. १६
द्वैतेऽनेकारसे सान्ते	३. ५५
धीप्राणावविनाभूतौ	१. २७
धीभावाभावसाक्ष्यात्मा	२. ५६
धीरेवात्मेति विज्ञान-	१. २६
धीसाक्षित्वेन विज्ञानम्	२. २२
ध्यभावसाक्षित्वे समः	२. ६३
ध्यात्मनोरच्छरूपत्वात्	१. ४६
न सत्यत्वादयो धर्माः	२. २७
न सर्वभावोऽत्र किंतु	३. ५४
न हि तत्राद्वयं युक्तम्	३. ४८
न हि वेदान्तसिद्धान्ते	२. ६०

नात्मभिन्नः परागर्थः	२. ७७	भास्याभावे भासकत्वम्	३. २६
नानार्थप्रतिबिम्बेषु	३. २७	भिद्यते हृदयग्रन्थिः	१. ४५
नित्यानन्दो विशुद्धोऽपि	३. २०	मतिं प्राप्यापि बहुधा	३. ६८
नित्यापरोक्ष आत्मेति	२. ३४	मन्दबुद्धेः प्रकृत्यादि-	३. ५८
नित्यापरोक्ष एवात्मा	३. ७०	मिथ्याज्ञानमतद्रूपम्	३. २३
नित्या मायेश्वरी शक्तिः	१. ३६	मिथ्याज्ञानस्य नाशेन	३. ११
निरोधे सर्ववृत्तीनाम्	३. २५	मुख्यं तत्प्रणिधानं स्यात्	३. ७१
निर्दुःखसुखभाङ्मोक्षे	३. १२	मृत्योर्मुखात् स आत्मैव	२. १३
पदार्थत्वापेक्षया स्यात्	३. ३८	मोक्षसंसाधकं कर्म	१. ४७
पदेनार्थप्रतीतौ स्यात्	२. ३३	यत्र नान्यदयं द्रष्टा	२. ४
पराच्याः परिणामेन	१. ३१	यत्रेमे सदसद्रूपे	२. ७२
पराञ्चि बाधितेऽर्थेऽस्मिन्	१. ३०	यथाग्निरनभिव्यक्तः	२. ४७
परं फलं जीवनजन्मनोस्तत्	२. ८१	यथान्योन्यात्मताध्यासः	१. ४१
पश्यामि जिघ्रामीत्याद्याः	२. २	यदिदं प्रत्ययेनात्म-	१. २१
पृथक्स्वप्नेनानुभूय	३. ५३	यद्यद्वाञ्छेन्नरस्तत्तत्	३. ७२
प्रक्रम्य ब्रह्मजिज्ञासाम्	२. ३६	यद्विज्ञानेन सर्वस्य विज्ञानम्	२. ६१
प्रश्नं शिवार्थं सुगतस्य चक्रे	३. ७४	यद् व्यक्तं तदसन्माया	२. ५७
प्रियानर्थानुभूत्यास्य	१. २८	यस्यामहं ममेत्येतत्	२. ५५
बन्धस्यात्मनि संसर्गम्	३. १०	यावदाभासमात्मज्ञः	१. ५६
बाध्या शब्दानुमानाभ्याम्	३. ३७	योगभाष्ये कृतं कर्म-	१. ६
बुद्धेरविषयः प्रत्यक्	२. ६	यो ज्ञातोऽन्यैःप्रत्यगात्मा	२. ५१
बुभुक्षितो नित्यतृप्तः	१. ६१	रजस्तमोभवा जैवाः	२. ५०
ब्रह्मवित् परमेतीति ब्रह्म-	१. ५	रजस्तमःसत्त्वगुणैः प्रवृत्तिः	१. ६६
ब्रह्मवित् परमेतीति प्रक्रम्य	२. ३८	वदतीति व्याससूत्रे	२. ४०
ब्रह्मात्मानमवेत्तस्मात्	३. ५२	वस्तूपलक्षकत्वेन	२. १६
भर्त्सौ पुरस्थे धीदोषात्	३. २	वाक्यार्थावगतिर्दृष्टा	२. ३२
भावाभावौ बुद्धिवृत्तेः	२. १	विज्ञेयं सत्यमद्वैतम्	३. ६६
भासितार्थत्ववित् पश्यन्	३. २८	विपाकस्यापि नाशोक्तौ	१. ५२
भास्यस्य सत्त्वासत्ताभ्याम्	३. ३१	विपाकारम्भताहानिः	१. ५१

विभिन्नार्थत्वतो नास्य	१. ८
विभुत्वसौक्ष्म्यासङ्गित्व-	२. ३०
विमोक्षमन्त्रपादोऽपि	३. ६
विरुद्धदृष्टान्तवशात्	३. ४४
विरोधः शब्दयोरस्ति	३. ४५
विलयाद् वाङ्मनःप्राण-	२. ७
विवक्षितं विशिष्टं चेत्	२. १६
विशेषमविशेषस्य	२. ७४
विशेषरहितं ब्रह्म	१ १३
विशेषं बाधशेषेऽस्मिन्	२. ७३
विशेषं रसगन्धानाम्	२. ५३
विशेषं संपरित्यज्य	२. ५२
वेदिता वेदने वेद्यम्	२. ८०
व्यभिचारिषु देहाद्य-	१. २२
व्यवहारोऽपवर्गान्तः	१. ४२
व्युत्थाने व्यभिचारोऽस्य	३. ६७
शब्दप्रमाणं प्रबलम्	३. ४१
शब्दानुगतया युक्त्या	३. ३५
शब्दे संकेतोऽनुमाने	२. ६७
शिवप्रसादेन विनिश्चितार्थः	३. ७५
शिवार्थं सुगतप्रश्नम्	१. ३
शीतोष्णगन्धधूलिभिः	१. ३८
शुनामत्र घृतं गव्यम्	१. ६४
श्रोता मन्तेति यो व्यक्तः	२. ४६
श्रोत्रियब्रह्मनिष्ठस्य	१. ६
सत्त्वात् प्रकाशो रजसः	२. ४३
सत्यज्ञानानन्ततया	२. ३१
सत्यं ज्ञानमनन्तं यत्	२. २३
सत्यं ज्ञानमनन्तं हि	२. २६
सदद्वैतमसद्द्वैतम्	३. ५७
सदास्वादमपि ज्ञानम्	१. ६३
समुदायस्य चात्मत्वे	१. २३
सर्वगन्धः सर्वरसः	२. १४
सर्वस्य सर्वदात्मायम्	१. ३२
सर्वान्यसत्यमूलेऽस्मिन्	३. ५६
सर्वाभावः सुषुप्तौ हि	२. ४१
सर्वोपाधिषु यस्तिष्ठन्	२. १७
सर्वं ब्रह्मेति वाक्ये स्यात्	२. १८
सहकारफलादीनाम्	२. ६८
साध्यस्याधिगमे साक्षात्	१. ५०
सान्निध्याद् ध्यात्मनोः	१. ४०
सुप्तिं प्रक्रम्यात्र पिता	३. ५०
सुषुप्तावात्मनोऽन्योऽर्थः	२. ४५
सोऽत्यन्तकारणोच्छेदात्	३. ७
संबन्धभेदाद् भेदोक्त्याः	२. २६
संस्कारजनको योगः	३. २६
स्तो द्रष्टृदृश्यतेऽद्वैते	२. ६
स्रष्टा ब्रह्मात्मता न्यायेना-	१. १५
स्यात् सामान्यविशेषादि-	३. ४०
स्वजाकाशदिशब्दादि-	२ १२
स्वभावसिद्धो द्वैतस्या-	३. ६५
स्वभावोपाधिधर्माभ्याम्	२. ४८
स्वविज्ञातानुसारेण	३. ३६
हानोपादानविषय-	१. ५८

नामसूची

अक्षपादः	३. ६
उपनिषत्	३.२४
कपिलः	३.१०,३.५८
कर्ममीमांसकाः	३.३४
कापिलम्	३.३६
कुमारिलः	३.७८
कुमारिलस्वामिपादः	पृः ७,१६,२४
गौतमः	३.८,३ १३
चतुर्थोऽध्यायः [ब्रह्मसूत्रस्य]	१.५३
पतञ्जलिः	३ १४,३.५८
बृहदारण्यकोपनिषत्	२.६
भर्तुः	३.२
योगः	३.५७
योगभाष्यम्	१. ६
वादरायणः	१.१६
वामदेवः	१.११
विज्ञानवादी	१.२६
वेदविदः	१.३५
वेदान्तः	१.११,२.४०,२.६०,२.६२,३.६
व्यासः	२.३६
व्याससूत्रम	२.४०
शिवः	१.२,१.३,३.७५
शिवप्रश्नः	३.७४
शिवोक्तसूत्रम्	३.७५
शिवोक्तसूत्रभाष्यम्	३.७५
श्वेतकेतुः	२. ७
सांख्यः	१.४८
सुगतः	३.७४

आकरसङ्केतः

कारिकासंख्या	स्पृष्टं वाक्यादिकं	आकरः	तत्सङ्केतः
१. ५	ब्रह्मविदाप्नोति परम्	तैत्तिरीयोपनिषत्	२.२.१
१.१०	तदात्मानमेवावेदहं ब्रह्मास्मीति । तस्मात् तत्सर्वमभवत् । तद्यो देवानां प्रत्यबुध्यत स एव तदभवत् । तथर्षीणाम् । तथा मनुष्याणाम् ।	बृहदारण्यकोपनिषत्	१.४.१०
१.११	तद्धैतत् पश्यन् ऋषिर्वामदेवः प्रतिपेदेऽहं मनुरभवं सूर्यश्च ।	,,	१.४.१०
१.१२	यं ज्ञात्वा मुच्यते जन्तुः ।	कठोपनिषत्	२.३. ८
	नान्यः पन्था विमुक्तये ।	कैवल्योपनिषत्	६
	तमेव विदित्वाति मृत्युमेति नान्यः पन्था विद्यतेऽयनाय ।	श्वेताश्वतरोपनिषत्	३.३. ८
	आचार्यवान् पुरुषो वेद ।	छान्दोग्योपनिषत्	६.१४.२
१.१३	द्रः विशेषहीनश्च कविः पुराणः ।	देव्युपनिषत्	१५
१.१६	अथातो ब्रह्मजिज्ञासा ।	ब्रह्मसूत्रम्	१.१.१
	अयमात्मा ब्रह्म ।	बृहदारण्यकोपनिषत्	२.५.१६
	आत्मा ब्रह्मैव ब्रह्मात्मैव ।	नृसिंहोत्तरतापिन्युपनिषत्	६.६
१.१७	तर्काप्रतिष्ठानात्··· ।	ब्रह्मसूत्रम्	२.१.११
१.१६	द्वितीयाद् वै भयं भवति ।	बृहदारण्यकोपनिषत्	१.४.२
१.२३	संघातपरार्थत्वात् ।	सांख्यकारिका	१७
	···परार्थसंहत्यकारित्वात् ।	योगसूत्रम्	४.२४
१.२५	अहं ब्रह्मास्मि ।	बृहदारण्यकोपनिषत्	१.४.१०
१.४५	भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः । क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे ॥	मुण्डकोपनिषत्	२.२.८
१.५०	उपाधिनाशाद् ब्रह्मैव सद् ब्रह्माप्येति निर्द्वयम् ।	आत्मोपनिषत्	२१

१.५३	अनारब्धकार्य एव तु पूर्वे तदवधेः ।	ब्रह्मसूत्रम्	४.१.१५
१.५४	भोगेन त्वितरे क्षपयित्वा संपद्यते ।	„	४.१.१९
२. १	द्रः सदा ज्ञाताश्चित्तवृत्तयस्तत्प्रभोः पुरुषस्यापरिणामित्वात् ।	योगसूत्रम्	४.१८
२. ४	यत्र नान्यत् पश्यति नान्यच्छृणोति नान्यद् विजानाति स भूमा ।	छान्दोग्योपनिषत्	७.२४.१
२. ५	अथात आत्मादेश एव	„	७.२५.२
	अथातोऽहङ्कारादेश एव	„	७ २५.१
२. ६	सोऽनुवीक्ष्य नान्यदात्मनोऽपश्यत्	बृहदारण्यकोपनिषत्	१.४.१
२. ७	अथ यदास्य वाङ्मनसि संपद्यते, मनः प्राणे, प्राणस्तेजसि, तेजः परस्यां देवतायामथ जानाति ।	छान्दोग्योपनिषत्	६.१५.२
२. ८	इन्द्रियेभ्यः परं मनो मनसः सत्त्वमुत्तमम् । सत्त्वादधि महानात्मा महतोऽव्यक्तमुत्तमम् ॥	कठोपनिषत्	२.३.७
२.१३	अशब्दमस्पर्शमरूपमव्ययं तथारसं नित्यमगन्धवच्च यत् । अनाद्यनन्तं महतः परं ध्रुवं निचाय्य तं मृत्युमुखात् प्रमुच्यते ॥	„	१.३.१५
२.१४	···सर्वगन्धः सर्वरसः ।	छान्दोग्योपनिषत्	३.१८.२;४
२.१७	एष त आत्मान्तर्याम्यमृतोऽदृष्टो द्रष्टा··· ।	बृहदारण्यकोपनिषत्	३.७.२३
२.१८	सर्वं खल्विदं ब्रह्म तज्जलान् ।	छान्दोग्योपनिषत्	३.१४.१
२.१९	अथात आदेशो नेति नेति ।	बृहदारण्यकोपनिषत्	२.३.६
	स एष नेति नेत्यात्मा ।	„	३.९.२६;४.२.४; ४.४.२२;४.५.१५
२.२३	सत्यं ज्ञानमनन्तं ब्रह्म ।	तैत्तिरीयोपनिषत्	२.१.१
२.३७	अयमात्मा ब्रह्म सर्वानुभूः ।	बृहदारण्यकोपनिषत्	२.५.१९
	तत् सृष्ट्वा तदेवानुप्राविशत् ।	तैत्तिरीयोपनिषत्	२.६.१
२.३८	ब्रह्मविदाप्नोति परम् ।	„	२.१.१
	सत्यं ज्ञानमनन्तं ब्रह्म ।	„	२.१.१

	अयमात्मा ।	तैत्तिरीयोपनिषत्	२.१.१
२.३६	अथातो ब्रह्मजिज्ञासा ।	ब्रह्मसूत्रम्	१.१.१
	द्युभ्वाद्यायतनं स्वशब्दात् ।	,,	१.३.१
	तमेवैकं जानथ आत्मानं अन्या वाचो विमुञ्चथामृतस्यैष सेतुः ।	मुण्डकोपनिषत्	२.२.५
२.४०	वदतीति चेत्-न, प्राज्ञो हि प्रकरणात् ।	ब्रह्मसूत्रम्	१.४.५
	पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः ।	कठोपनिषत्	१.३.११
२.४२	अथात आदेशो नेति नेति ।	बृहदारण्यकोपनिषत्	२.३.६
	स एष नेति नेत्यात्मा ।	,,	३.६.२६;४.२.४; ४.२.२२;४.५.१५
२.४३	तुल॰ सत्त्वं लघु प्रकाशकमिष्टम् उपष्टम्भकं चलं च रजः गुरुवरणमेव तमः ।	सांख्यकारिका	१३
२.६१	आत्मेत्येवोपासीतात्र सर्वे एकं भवन्ति ।	बृहदारण्यकोपनिषत्	१.४.७
	तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति ।	मुण्डकोपनिषत् कठोपनिषत्	२.२.१०; २.२.१५
२.६२	नानुध्यायाद् बहून् शब्दान् वाचो विग्लापनं हि तत् ।	बृहदारण्यकोपनिषत्	४.४.२१
२.६३	स एष नेति नेति ।	,,	४.४.२२
२.७८	अतोऽन्यदार्तम् ।	,,	३.४.२;३.५.१;३.७.२३
३. ६	विरामप्रत्ययाभ्यासपूर्वः संस्कारशेषोऽन्यः ।	योगसूत्रम्	१.१८
३. ८	सुषुप्तस्यस्वप्नादर्शने क्लेशाभावादपवर्गः ।	न्यायसूत्रम्	४ १.६३
३. ९	प्रमाणप्रमेय···निग्रहस्थानानां तत्त्व- ज्ञानान्निःश्रेयसाधिगमः ।	,,	१.१.१
३.१०	न नित्यशुद्धबुद्धमुक्तस्वभावस्य तद्योग- स्तद्योगादृते ।	सांख्यसूत्र	१.१९
	नाविद्यातोऽपि, अवस्तुना बन्धायोगात् ।	,,	१.२०

३.१३	तदत्यन्तविमोक्षोऽपवर्गः ।	न्यायसूत्रम्	१.१.१४
३.१४	पुरुषार्थशून्यानां गुणानां प्रतिप्रसवः कैवल्यं स्वरूपप्रतिष्ठा वा चितिशक्तिरिति ।	योगसूत्रम्	४.३४
३.१५	द्रः नित्यं सुखमात्मनो महत्त्ववन्मोक्षेऽभिव्यज्यते ।...तेषां प्रमाणाभावादनुपपत्तिः ।	न्यायभाष्यम्	१.१.२२
३.२०	वृत्तिसारूप्यमितरत्र ।	योगसूत्रम्	१.४
३.२१	वृत्तयः पञ्चतय्यः क्लिष्टाक्लिष्टाः ।	,,	१.५
	प्रमाणविपर्ययविकल्पनिद्रास्मृतयः ।	,,	१.६
३.२२	प्रत्यक्षानुमानागमाः प्रमाणानि ।	,,	१.७
३.२३	विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठम् ।	,,	१ ८
	शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः ।	,,	१.९
३.२४	अभावप्रत्ययालम्बना वृत्तिर्निद्रा ।	,,	१.१०
	अनुभूतविषयासंप्रमोषः स्मृतिः ।	,,	१.११
३.२५	अभ्यासवैराग्याभ्यां तन्निरोधः ।	,,	१.१२

३ ३४ कललादिषु विज्ञानमस्तीत्येतच्च साहसम् ।
असंजातेन्द्रियत्वाद्धि न तत्रार्थोऽवगम्यते ॥
न चार्थावगतेरन्यद् रूपं ज्ञानस्य युज्यते ।
मूर्छादावपि तेनास्य सद्भावो नोपपद्यते ॥

* * * * * *

ज्ञानशक्तिस्वभावोऽतो नित्यः सर्वगतः पुमान् ।
श्लोकवार्तिकम् आत्मवादे ६५,६६,७३

द्रः गूढं चैतन्यमुत्प्रेक्ष्य जडबोधस्वरूपताम् ।
आत्मनो ब्रूवते भाट्टाश्चिदुत्प्रेक्षोत्थितस्मृतेः ॥ पञ्चदशी ६. ९५

३.३९	महदाद्याः प्रकृतिविकृतयः सप्त ।	सांख्यकारिका	३
३.४७	तत् सत्यम् ।	तैत्तिरीयोपनिषत्	२.६
	ऐतदात्ममिदं सर्वं तत् सत्यं स आत्मा । तत्त्वमसि श्वेतकेतो ।	छान्दोग्योपनिषत्	६.८.७

३.५०	अत्र पितापिता भवति ।	बृहदारण्यकोपनिषत्	४.३.२२
३.५२	ब्रह्म वा इदमग्र आसीत् । तदात्मान-मेवावेदहं ब्रह्मास्मीति ।	,,	१.४.१०
	आत्मैवेदमग्र आसीत् ।	,,	१.४.१,१७
३.५४	यत्र त्वस्य सर्वमात्मैवाभूत् ।	,,	४.५.१५
३.५८	ईश्वरप्रणिधानाद् वा ।	योगसूत्रम्	१.२३
३.६२	सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम् ।	छान्दोग्योपनिषत्	६.२.१
३.६६	तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम् ।	मुण्डकोपनिषत्	१.२.१२
	आत्मा वारे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः ।	बृहदारण्यकोपनिषत्	४.५.६

टिप्पनानि

१.	१	ख	दारुत्सारदारस्तात[?]जीवकवि°	मा[तृकायाम्]
१.	४	क	मुखावसुखावशुभी	मा
		ग	नैकांत्यं तत्···षां	मा
१.	६	ख	श्रवणं सेवनं सेवया	मा
१.	१४	ग	ज्ञाताज्ञानविलक्षणः	मा
१.	१५	कख	न्मायेन साशङ्कथास्त्य°	मा
		ग	तदा परोक्षी...तेतो	मा
१.	२१	क	य इदं प्रत्ययेनात्म°	मा
१.	२२	ग	आत्मनस्तत्त्वमज्ञानं	मा
१.	२३	ग	संहितानां ग्रहादिवत्	मा
१.	२५	ख	तद्भावे=धीभावे	
१.	२६	घ	°सास्त्यनित्याऽत एव हि इति पाठ्यम्।	
१.	२७	ग	उपासनायाम्=उपासनाकाण्डे।	
१.	२८	क	प्रियानर्थानुभियात्य	मा
१.	२९		अयं श्लोको मातृकायां १.३१तमश्लोकात् परं वर्तते। श्लोकसंख्यानुसारं चायमत्र सन्निविष्टः।	
१.	३२	ग	अतज्ज्ञानम्=स्वप्रकाशभिन्नविषयकं ज्ञानम्।	
१.	३३	ख	°त्याशंकां नापरोक्षतः	मा
१.	३४	क	अध्यासोऽन्यत्रान्यत्रान्य°	मा
१.	३७	क	°मवस्तु त्याद्संगत्वादना°	मा
१.	४०	कख	सान्निध्याध्या°भानमग्य°	मा
		ख	पशोरिवेति पाठ्यम्।	
१.	४२	घ	विदां=जीवन्मुक्तानाम्	
१.	४४	कख	उच्छिन्नद्रु···स्य हरितत्ववत्	मा
१.	५१	ख	श्ले··योश्लेषोऽप्यतो मतः	मा
१.	५४	क	कुशलाकुशले=कुशलसहितेऽकुशले क्षीणे सति।	

१.	५६	ख	कर्मसंस्कारः = कर्मणः संस्कारः ।	
१.	६०	ख	सुस्वादुमत्त्वयम्	मा
१.	६४	क	शु ··मत्र गन्तव्यम्	मा
१.	६६	ग	°विशेष एकोऽहम्	मा
२.	१	घ	भावाभावौ मतिर्यथा	मा
२.	२	ग	तत् ज्ञात्वा	मा
२.	५	ग	आत्मेति त्यक्तम्	मा
२.	६	क	स्याद्रष्टृदृश्यता°	मा
२.	८	क	इन्द्रियार्थेति पाठ्यम्	
२.	११	गघ	तदावसाद्यात्माद्रष्ट्रयद्भुक्त्योपलक्षितः। पुनः 'लक्ष्यते' इति पत्रप्रान्ते	
२.	१३	घ	यस्मंचीय्य	मा
२.	१५	क	बुद्धिशुधावुपासनात्	मा
		घ	श्रुत्यां ते बुहुवर्णिते	मा
२.	१८	क	सर्वं ब्रह्मेत्यस्मात् पूर्वं अध्यारोपमिति मातृकायामधिकम् ।	
२.	२०	कख	लोकसिद्ध अनूद्या°	मा
		ख	°मनूद्याप° इति पाठ्यम्	
		घ	किं त्यपबाधने	मा
२.	२१	घ	°मध्यारोपो महान्मत इति पाठ्यम् ।	
२.	२२	घ	तुष्ट्यार्थं बहुवणंनम्	मा
२.	२४	ग	साक्षी स···त्मा	मा
२.	२५	घ	न स्या ज्ञानं च	मा
२.	२६	क	ज्ञानानन्ताद्धि	मा
			पुनः पत्रप्रान्ते हिशब्दो योजितः ।	मा
२.	२८	क	भेदोक्ताः	मा
२.	३४	क	परोक्षतात्मेति	मा
		ग	वस्त्वभेपि तद्भेद°	मा
२.	४१	घ	°त्तज्ञानं तु	मा
२.	४२	घ	तत्प्रतीतः	मा

२.	४७	ग	तथा सदात्मा निश्चेयो	मा
२.	४७	घ	व्यक्तो योपाधि	मा
२.	४६	घ	°चिदात्मता	मा
२.	५०	ग	ब्राह्मा स्वरतः	मा
२.	५२	क	विशेषात् संपरित्यज्य	मा
२.	५७	गघ	येन सर्वसाक्षिणा गृह्यते इति शेषः ।	
२.	६०	घ	नात्मार्थज्ञेयज्ञा ...ता	मा
२.	६२	घ	वाग्विग्लापनाश्रुतेः	मा
२.	६३	क	ध्यभावसाक्षित्वे	मा
		ग	बह्रूक्तापि	मा
२.	६५	कख	एवमंतः शब्दप्रामाण्यात्मा प्रमेयते	मा
		घ	आपरोक्षेण	मा
२.	६६	क	°निवृत्तादि°	मा
२.	६६	ग	तत्स्वभावविशेषस्य	मा
२.	७२	घ	इति तद्ब्रह्म°	मा
२.	७६	ख	ह्यात्मचिन्तये	मा
२.	८०	क	वेदने द्वे वित्तिश्च वित्तिसाधनं चेति ।	
		घ	मायैवमणि	मा
२.	८१	कख	°जन्मनोस्तद्वदातम°	मा
		गघ	विपाकोऽस्त्यर्थकामस्य	मा
			पुष्पिकायाम्-स्वामिपादविरचित°कारिकायां	मा
३.	१	ग	दोषा बुद्धीन्द्रियाक्षाणां	मा
		घ	अयथार्थन्तु	मा
३.	२	क	भर्त्सां पुरस्ये	मा
३.	३	क	दूरस्य त्वार्थदोषेण	मा
३.	४	ग	प्रत्यभिज्ञाभया°	मा
३.	१२	ग	यन्ममोक्षेण तन्नित्य°	मा
३.	१३	गघ	°मानन्दमुपेक्षामाह	मा

३.	१४	गघ	चितिं स्वरूपवादेति संनानन्दं	मा
३.	१६	ग	वृत्तिसंसारभात् कित्रं	मा
३.	१७	ग	दृष्टं तद्योतिनः काय°	मा
३.	१६	ख	साक्षाद् वित्तसाक्षित्व°	मा
३.	२०	ख	प्रतिबिम्बतः	मा
३.	२२	घ	विस्तराभ्यास्य लक्षणम्	मा
३.	२३	क	°मनिष्टमित्यत्र °प्रतिष्ठमिति पाठ्यम् ।	
३.	२५	ग	आसोत्रान्यदावृत्तेः	मा
			जन्यदा निरोधादन्यत्रेत्यर्थः ।	
३.	२६	घ	तथा तज्ञातुरात्मनः	मा
३.	३०		भास्यार्थासत्यता चित्वे	मा
३.	३२	ख	शक्त्यभिव्यक्तचेतनाम्	मा
		ग	तदवाव चेतनत्वं	मा
			तदभावे वृत्त्यभाव इत्यर्थः ।	
३.	३३	क	मनोऽसत्त्वे मनःसंयोगासत्त्व इत्यर्थः ।	
३.	३५	गघ	साऽयुक्त्या तयार्थस्याविनिश्चयादिति पाठ्यम् ।	
३.	३६	घ	°र्यधिकारिभिः स्वभावोऽपि भिन्न इत्याशयः ।	
३.	३७	ख	भासः = सूर्यस्य; अणुता = क्षुद्रत्वम् ।	
		घ	अर्थवित् = अर्थविज्ञानम्	
३.	४०	गघ	सामान्यतो नोक्तिः = विशेषत उक्तिरित्यर्थः ।	
३.	४१	ग	तयोर्ध्यार्थापरोक्षो तु	मा
		घ	तत्प्रामाण्यातिनिश्चयः	मा
३.	४२	क	दोषबुद्धीन्द्रियार्थानाम्	मा
		ग	अनुमानसदुष्टत्वम्	मा
३.	४३	ख	°नुमानं ह्यत्तबाधितमिति पाठ्यम् ।	
		ग	अस्थित्वात् कन्धशुचिता	मा
३.	४५		°दद्वैतोक्तेः प्रमाणतः	मा
३.	४८	गघ	°मद्वैतज्ञमज्ञैः कल्पते	मा

३.	५१	कख	सहसे सर्वज्ञातस्तु बाधते	मा
३.	५४	घ	न केवलः न वास्तव इत्यर्थः ।	
३.	५८	क	मन्दबुद्धेरित्यत्र मन्दबुद्धेय इति पाठ्यम् ।	
३.	६०	गघ	सदोषानुभवो = द्वैतज्ञानम ; निर्दोषानुभवेनाद्वैतज्ञानेत्यर्थः ।	
३.	६१	ख	तत्तन्त्रं तदधीनमित्यर्थः ।	
३.	६४	ख	सम्यग्दृष्टौ इति पाठः समीचीन इत्यनुमीयते ।	
		ग	प्रतीतिर्दोषजातोऽस्य	मा
३.	७२	ग	सप्रपञ्चानामिति पाठो युक्तः ।	
३.	७४	ग	इति प्रसिद्धाः :	मा

आकरसङ्केते

१.	१६	पुरुषार्थोऽतः शब्दादिति बादरायणः ब्रह्मसूत्रम् ३.४.१

मिथिलाविद्यापीठग्रन्थमालायां श्रीमता अनन्तलालठक्कुरेण

सम्पादिताः ग्रन्थाः

१. पारिजातहरणं महाकाव्यम् । कविकर्णपूरविरचितम् । अतिजीर्णमातृकातः समुद्धृत्य खण्डितांशप्रपूरणभूमिकापरिशिष्टादियोजनपूर्वकं प्रथमतया प्रकाशितम् । १९५६ मूल्यम् ८.००

२. काव्यलक्षणरत्नश्रीः । सिंहलाचार्यरत्नश्रीज्ञानविरचिता दण्डिकृतकाव्यादर्शटीका । दुर्लभमातृकातः प्राध्यापकश्रीउपेन्द्रझामहोदयसाहचर्येण प्रथमतया प्रकाशिता । भूमिकापरिशिष्टयुता । १९५७ मूल्यम् १५.००

३. वैशेषिकदर्शनम् । भट्टवादीन्द्रकृताप्रकाशितचरप्राचीनव्याख्योपेतम् । सामीक्षिकभूमिकापरिशिष्टाद्युपेतम् । १९५७ मूल्यम् ६.५०

४. आगमडम्बरं नाटकम् । भट्टजयन्तकृतम् । वे. राघवनाचार्यसाहचर्येण भूमिकापरिशिष्टादिभिरलङ्कृत्य प्रथमतया सम्पादितम् । यन्त्रस्थम् ।

५. न्यायचतुर्ग्रन्थिका । न्यायभाष्यवार्त्तिकतात्पर्यटीकापरिशुद्धिसंवलितन्यायदर्शनरूपा । अलब्धचरमातृकाधारेण निर्णीतपाठा । प्रथमाध्यायात्मकः प्रथमो भागः । यन्त्रस्थः ।

६. कुमारिलकारिकावल्यपराभिधा सौगतसूत्रव्याख्यानकारिका । कुमारिलस्वामिपादकृता वेदान्तसिद्धान्तप्रतिपादिका । प्राचीनमातृकातो भूमिकापरिशिष्टादिभिः संयोज्य प्रथमतया प्रकाशिता । मूल्यम् २.००

७. न्यायभाष्यवार्त्तिकतात्पर्यविवरणपञ्जिका अनिरुद्धाचार्यकृता । तात्पर्यटीकान्तन्यायग्रन्थानामुपरि प्राचीनतमा प्रामाणिकी टीका । द्वितीयादिपञ्चमाध्यायान्ता । यन्त्रस्था ।

८. कीरदूतम् खण्डकाव्यम् । श्रीरामगोपालकविकृतं रुद्रनाथन्यायपञ्चाननभट्टाचार्यविरचितपिकदूतोपेतम् । भूमिकापरिशिष्टादियुतम् । यन्त्रस्थम् ।